Total No. of Questions : 5 Total No. of Printed Pages : 2

**Code No.: MR-01**

# स्नातकपरीक्षाः- २०१५

## बि.ए. - विद्वन्मध्यमा - तृतीयवर्षः

## शास्त्रम् - अलङ्कारशास्त्रम्

**भागः - १, पत्रिका - १**

**विषयः - कुवलयानन्दः - ३**

**दिनाङ्कः** - 26-3-2015 **गरिष्ठाङ्काः** - १००

**समयः** - 10.00 A.M. to 1.00 P.M. Max. Marks - 100

---

**I. एकेन वाक्येन उत्तरं लिखत - 10×1=10**

१. काव्यलिङ्गस्य लक्षणं किम्?

२. बहूनामप्यसाराणां संयोगः कार्यसाधक इति सामान्यस्य समर्थको विशेषः कः?

३. उल्लासे अन्यगुणात् अन्यत्र गुण इति प्रथमप्रभेदस्य उदाहरणं किम्?

४. प्रकृतर्थानां क्रमिको न्यासः कोऽलङ्कार?

५. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः - अस्योत्तरार्धं किम्?

६. 'मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके' इत्यत्र अलङ्कारः कः?

७. सिद्धस्यैव विधानमिति कस्यालङ्कारस्य लक्षणम्?

८. समाहितमिति कस्यालङ्कारस्य नामान्तरम्?

९. नीरक्षीरन्यायेन द्वयोलङ्कारयोः समावेशे कीदृशोऽलङ्कारो भवति?

१०. अप्पय्यदीक्षिताः कस्य नियोगात् कुवलयानन्दम् अकार्षुः?

**II. अलङ्कारचतुष्टयं सलक्षणोदाहरणं विवृणुत - 4×5=20**

१. सम्भावना २. मुद्रा ३. निरुक्तिः ४. विषादनम्

५. हेतोः प्रथमः प्रभेदः ६. सन्देहालङ्कारः ७. अनुमानम्

**III. त्रयाणामुत्तरं लिखत - 3×10=30**

१. काव्यलिङ्गं परिकरात् कथं भिद्यते? विशदीकुरुत

२. ललितस्य स्वतन्त्रालङ्कारत्वं कथम्? उपपादयत।

३. पूर्वरूपं कथं कथं भवति? सोदाहरणं विवृणुत।

४. अष्टौ प्रमाणालङ्काराः के? तेषु प्रत्यक्षमनुमानं च सोदाहरणं निरूपयत।

५. मीलितसामान्ययोः मिथो वैलक्षण्यं किम्? सोदाहरणं स्फुटीकुरुत।

- अनुवर्तते

**IV. पद्यत्रयं व्याख्याय तत्रस्थं विशेषं सहेतुकमाविस्कुरुत** 3×5=15

१. यदयं रथसंक्षोभादंसेनांसो निपीडितः।
एकः कृती मदङ्गेषु शेषमङ्गं भुवो भरः।।

२. जीयादम्बुधितनयाधररसमास्वादयन् मुरारिरयम्।
अम्बुधिमथनक्लेशं कलयन् विफलं च सफलं च।।

३. राजन्! सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः।
पुनस्त्वद्वैरिवनिताबाष्पपूरेण पूरिताः।।

४. कुशलं तस्या जीवति, कुशलं पृच्छामि, जीवतीत्युक्तम्।
पुनरपि तदेव कथयसि, मृतां नु कथयामि या श्वसिति।।

५. निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि।
अन्यथा नोपपद्येत पयोधरभरस्थितिः।।

**V. अ. त्रिषु वाक्येषु अलङ्कारविशेषं सलक्षणं स्फुटयत -** 3×5=15

१. जितोऽसि मन्दकन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः।

२. विपदः सन्तु नः शश्वद्यासु सङ्कीर्त्यते हरिः।

३. भुजङ्ग, एव जानीते भुजङ्गचरणं सखे।।

४. असावुदेति शुभ्रांशुर्मानच्छेदाय सुभ्रुवाम्।

५. सखि! पश्य गृहरामपरागैरस्मि धूसरा।।

**आ. द्वयोः युग्मयोः अलङ्कारद्वयवैलक्षण्यं सयुक्तिकं निवेदयत -** 2×5=10

१. विकस्वरः अर्थान्तरन्यासश्च २. विधिः प्रतिषेधश्च

३. सूक्ष्मं पिहितं च ४. उदात्तमत्युक्तिश्च

---